# शैवागमे तत्त्वत्रयनिरूपणम्

Dr. V.V. Anilkumar
Asst. Professor,Dept.of Sanskrit, Sree Sankara College, Kalady

Submitted on: 07/10/2020 Revised on:15/10/2020 Accepted on:19/10/2020

भारतीयसंस्कृतेः हृदयं भवति आगमसाहित्यम्। आगमज्ञानं विना निगमानां स्वरूपावधारणमशक्यम् इति विद्वदनुभवः । यतो हि तन्त्रागमेष्वन्तर्निहितानां तत्त्वानां मूलस्रोतो भवति वेदः । पारिभाषिकशब्दानां आगमसाहित्यविद्यमानानां लौकिक्या दृष्ट्या अर्थावधारणे भ्रमो सञ्जायेत । वेदाधारेणैव तेषां तात्पर्यमवगन्तव्यम् । उक्तञ्च आगमसाहित्यमधिकृत्य -

श्रुत्युक्तस्तु कृते धर्मस्रोतायां स्मृतिसम्भवः ।
द्वापरे तु पुराणोक्तः कलावागमसंभवः ॥ ( आगममीमांसा व्रजवल्लभद्विवेदी पु. 1 )

कलिकाले आगमसाहित्यस्य महत्वं श्रुतिसंज्ञया अपि आचार्यैः दत्तम्- वैदिकी तान्त्रिकी चेति द्विविधा श्रुतिरुच्यते - इति मनुस्मृतेः। कुल्लूकभट्टाचार्योक्तिः आगमानां श्रुतिसंज्ञा सम्बोधिता।
पार्वतीं प्रति परमेश्वरमुखात् आगतं आगमशास्त्रं परिपावनमेव । आगमाः विष्णुशिवशक्तिभेदात् विभक्ताः । तेष्वागमेषु शैवागमानां प्राधान्यं सुविदितम् ।

## शैवागमः ।

शिवपुराणे द्विविधः शिवागमः प्रदर्शितः । श्रौतः स्वतन्त्रश्च । स्वतन्त्रशिवागमाः दशधा, अष्टादशधा च विभक्ताः इति आचार्यमतम्। तेषामागमानां सिद्धान्तपदवाच्यत्वमस्ति। सिद्धान्तशब्दश्च पङ्कजादिशब्दवत् योगरूढ्या शिवप्रणीतेषु कामिकादिषु दशाष्टादशसु तन्त्रेषु प्रसिद्धः इति घोरशिवाचार्योक्तिः प्रमाणयति । श्रौतागमाः प्रायेण पाशुपतसंज्ञया प्रसिद्धाः । तत्र क्रियातपोजपध्यानदानात्मकानि पञ्चपर्वाणि चतुर्भिः महर्षिभिः रुरु-दधीचि-अगस्त्य-उपमन्वादिभिः उपदिष्टादिभिः उपदिष्टानि भवन्ति।

अष्टविंशतिभेदभिन्नानां नामानि शैवागमस्य भूमिकायां प्रोक्तानि भवन्ति मतङ्गमृगेन्द्रौरवाजित देवीकालोत्तरवातुलशुद्धिः कामिककारणकिरणापौष्करादयः तत्र प्रथिताः । तत्र .सिद्धान्तशैवदर्शने विद्यमानानां तत्त्वत्रयाणां विचारः अत्र क्रियते।

**सिद्धान्तशैवदर्शने तत्त्वत्रयम् ।**

शैवज्ञानं परापरभेदात् द्विविधः । परश्च अवबोधरूपः अपरः कामिकादितन्त्रस्वरूपम्। अवबोधस्वरूपं च ज्ञानं शिवस्य शक्तिरेव । सा शक्तिः समवायपवर्तिनी, परिगृहवर्तिनीति द्विधा । सामान्यवर्तिनी बोधरूपा क्रियारूपा इति च विभक्ता। बोधरूपा सर्वार्थपरिच्छेत्री । क्रियारूपा च द्विधा- अनुगृहरूपा, तिरोधानरूपा । नादरूपेण प्रसृतां अवबोधशिवस्वरूपात् तन्त्राकारतां प्राप्तमपरं सिद्धान्तनाम्ना प्रसिद्धं भवति ।

सिद्धान्तशैवदर्शनं त्रिपदार्थयुक्तं पादचतुष्टयात्मकं च । पतिपशुपाशाख्याः त्रिपदार्थाः । विद्याक्रिया योगचर्चारूपाः चत्वारः पादाः । पशुःतावत् अस्वतन्त्रः । चैतन्यरहितः पाशः । चेतनः सर्वज्ञः सर्वकर्ता च भवति पतिः शिवः । उक्तञ्च -

पशुपाशपतिज्ञानं ज्ञानमित्यभिधीयते
षडध्वशुद्धिविधिना गुर्वधीना - ( शिवपुराणम्- 7/2/10/31) ।

तेषां स्वरूपं क्रमेणात्र विचार्यते ।

**पतिः ( शिवः )**

पतिस्वरूपस्य निर्देशः विश्वसारोत्तरसूत्रे एवं भवति - अचेतनस्य मायादेः प्रवर्तकतया पतिः । सिद्धः सर्वार्थकृत् कर्ता व्यापकः सततोदितः। सर्वज्ञः सर्वकर्ता सर्वव्यापी सततोदितः नित्यमुक्तः भवति पतिः । सृष्टिरूपकार्यस्य कर्तृत्वं पत्युरेव । यस्य दृक् क्रियात्मकशक्तिद्वययुतः स्वतन्त्रः प्रभुः शिवः पतिरित्युच्यते इति पराख्यसूत्रव्याख्याने ।

**पत्युः स्वरूपम्**

आत्मनां मूर्तिद्वैविध्नमस्ति चला च अचला च । चला तत्त्वभौवनशरीरात्मिका अचला ज्ञानक्रियास्वभावा । पतिः अचलमूर्तिमान् एव । तस्य भौवनशरीरयुक्तता नास्ति । यद्यपि भौवनशरीरयुक्तत्वं नास्ति तथापि मूर्तित्वेन कल्पना तस्यास्ति । सृष्टिस्थितिसंहारनिग्रहानुग्रहकृत्येषु सः शरीरं स्वीकृत्य प्रवर्तयति । तस्मात् तस्य पञ्चमूर्तित्वमपि कल्पितम् । यथा तद्वपिः पञ्चभिः मन्त्रैः पञ्चकृत्योपयोगिभिः ईशतत्पुरुषा घोरवामाद्यैमस्तकादिकम् इति सद्योजातः, ईशानः तत्पुरुषः, अघोरः, वामदेवः इत्यादि नाम्ना सः व्यवह्रियते।

**पत्युः जगत्कर्तृत्वम्**

पतेः जगत्कर्तृत्वे शक्तिरेव करणं भवति। चित्सम्बन्धिनी सा शक्तिः चेतनस्वरूपा भवति । तद्वारेणैव जगदुत्पत्यादिकम् । तद्विषये सिद्धान्तचन्द्रिकायामुक्तम् -

यथा कालः ह्यमूर्तोपि दृश्यते कलसाधकः ।
एवं शिवः ह्यमूर्तोपि कुरुते कार्यमिच्छया ॥ ( आगममीमांसा, पु. 43)

जगत्सृष्ट्यादौ पत्युः इच्छाशक्तिरेव कारणम्। तथा सिद्धान्तसारावल्याम् -

शक्तिश्चित्तनुरीश्वरस्य करणं ज्ञेयेषु कार्येषु भेदैः सोपार्हता प्रयाति गुणतो भेदं क्रियाज्ञानतःनित्यं तत्सकलान्यकर्तृनिहिता वर्त्मन्यशुद्धे स्थिते कृत्यं सैव करोति पत्यनुगता वामादिशक्त्यात्मिका अमूर्तोपि शिवः क्षित्यादिकं कार्यं जगत् स्वकीयया इच्छया शक्त्या निष्पादयति॥

**त्रिविधः पतिः ॥**

शक्तोद्युक्तप्रवृत्तस्य कर्ता त्रिविध उच्यते शक्तेः प्रवृत्तिभेदेन भेदस्तयोपाचारतः। अयं त्रिविधो भेदः पत्युः शक्तेः प्रवृत्तिभेदेन संभवति। क्रमशः औदासीन्य-उद्योग-प्रवृत्तिरूपव्यापारेण॥ पतिः शान्तः सन्। निष्कलावस्थायाम् भवति। उद्युक्तः सन् सकलावस्थायां यदा प्रवर्तते तदा सदाशिवसंज्ञा यथा आत्मा शरीरसम्बन्धात् सकलः प्रलयावस्थायां निष्कलः मुक्त्यवस्थायां परः, एवं शिवः अपि सकलनिष्कलादिशब्दैः परामृश्यते।

**पशुः जीवः**

देहान्योनश्वरो व्यापी विभिन्नः सकलोजडः।

स्वकर्मफलभुक् कर्ता किञ्चिज्ञः सेश्वरः प्रभुः ॥ (परा.संहिता)

इत्येवंरूपेण परसंहितायां पशुस्वरूपं वर्णितम्। अत्र आचार्यैः जीवस्वरूपनिर्णयाय तद्व्याख्यातम्। देहान्य इत्यनेन चार्वाकमतनिरासः अनश्वरः इत्यनेन क्षणभङ्गवादनिरासः व्यापी इत्यनेन जैनपक्षनिरासः, विभिन्नः इत्यनेन एकजीवतावादनिरासः मलशब्दो ज्ञानावरकं कर्मभिन्नमज्ञानं बोधयति। तद्वान् भवति जीव इति। शरीरव्यतिरिक्तः नित्यः व्यापी अनेकः अज्ञानेनावृतः ज्ञानक्रियास्वभावः, स्वार्जितकर्मफलभोक्ता अल्पज्ञः ईश्वरेण प्रेरितः भोगं मोक्षं वा भुञ्चानः पुरुषः जीवात्मा पशुरिति शैवमतम्। पशुस्वरूपः जीवः अज्ञानरूपमलावृतः इत्यतः तस्मिन् चैतन्यं न प्रकाशते। पाशान्वितः भवति जीवः।

**पशोः त्रैविध्यम्**

पशुः त्रिधा विभक्तः भवति। विज्ञानकलः, प्रलयाकलः, सकलः ॥भोगादिना कर्मक्षये सति कलादिभोगसम्बन्धस्य अभावात् केवलमलमात्रयुक्तः जीवः विज्ञानकल इत्युच्यते। यदा प्रलयेन कलादीनां उपसंहारः जीवस्य भवति तदा प्रलयाकल इत्युच्यते। मलेन मायया कर्मणा च मुक्तः (त्रिबन्धमुक्तः) सकल इति व्यवहियते। विज्ञानकलः द्विप्रकारेण विभक्तः भवति- समाप्तकलुषः असमाप्तकलुषः च। प्रलयाकलः पक्वपाशद्वयः तद्विलक्षणः इति द्विविधः। तृतीयः सकलोपि द्विविधः पक्वकलुषः अपक्वकलुषः। परमेश्वरः शिवः जीवानां कर्मानुगुणं गतिं विदधाति इति आगमसाहित्यादवगम्यते।

**पशोः अवस्थात्रयम्**

स्वायम्भुवागमे पशो तिस्रावस्थाः निरूपिताः भवन्ति। यथा

अथात्माविमलो बद्धः पुनर्स्मृतश्च दीक्षया

विज्ञेयः स त्रिधावस्थाः केवलः सकलोमलः ॥ (स्वायंभुवागमः 3/16 )

सः जीवः केवलः सकलः अमलः इति अवस्थात्रयसहितः भवति। अत्यन्तमालिन्ययुतः भवति केवलावस्थः जीवः। कर्मणि अनुरक्तः सन् कलादिबन्धनेन बद्धः जीवः एव सकल इत्युच्यते। दीक्षया कलादिबन्धनात् मुक्तः भवति शुद्धः अमलावस्थः जीवः।

**केवलावस्थः जीवः**

अमूर्तः स पशुर्नित्यो निर्गुणो निष्क्रियो प्रभुः । मायोगतगतो व्यापी भोगापायेष्वशक्तितः स केवलास्त्विति प्रोक्तः स्वापवान्।( तत्त्वसंग्रहः- मलबन्धनात् सुप्रभेदागमः)

आगमानुसारेण केवलावस्थः जीवः व्यापकः सन्नपि मायया बद्धः भोगापायेषु अशक्तः प्रतिभाति। भोगैकरास्तिकः सन् कर्नवशतः सः सर्वेषु पर्यटति। कलारहित्यात् सः चेतनोपि अचेतन प्रतिभाति।

**सकलावस्थः**

संसारी विषयो भोक्ता क्षेत्री क्षेत्रज्ञ एल च

शरीरी चेति बन्धात्मा सकलः प्रोच्यते बुधैः -(स्वायंभुवागमः 4/13 )

इत्येवं स कलावस्थां जीवं निरूपयति अयं जीवः अहं बद्धः इति ज्ञात्वा तद्बन्धनविनिर्मुक्त्यै यतते।

**अमलावस्थः**

बन्धनिर्मुक्त्यै प्रयतमानान् जीवान् परमेश्वरः अनुगृह्णाति । शक्तिपातेति नाम्ना व्यवहृतस्य अस्य अनुग्रहेण शिवसायूज्यं प्राप्तः जीवः मलात् सर्वात् विनिर्मुक्तिः जायते। तदा स जीवः मुक्तः इत्युच्यते। उक्तञ्च

अशरीरं यदात्मानं पश्यति ज्ञानचक्षुषा।

तदा भवति शान्तात्मा सर्वतो विगतस्पृहः ॥ इति ॥ ( स्वायंभुवागमः 4/37)

**पाशस्वरूपम्**

शैवागमानुसारेण पाशत्वं नाम शिवानन्दाभिव्यक्तिविरोधित्वम्। तत् शिवरूपस्य आनन्दाभिव्यक्तेः विरोधितया भवति तत् पाशमित्यर्थः। पाशाः पञ्चविधाः भवन्ति। ते मल-तिरोधानशक्ति-महामाया-माया-कर्मश्च। मलपाशस्य अणव तथा महामायायाः बिन्दुरिति चापराख्यौ।

**मलपाशः**

पशोः चक्षुक्रियात्मकं तेजः प्रच्छादयति मलिनीकरोति इत्यतः प्रथमपाशस्य मल इत्यभिधा । अनादिकालात् प्रवृत्तः अयं पाशः जीवानां आणवत्वं सम्पादयति यथा ताम्रस्य कालिमा रसशक्त्या निवर्तते तथा अनादिर्मलः शिवशक्त्या निवारितो भवति। तथा चोक्तम् -

मलोज्ञानं तमोज्ञत्वं तिरस्कारकस्तथा

पतिः पशुरविद्येति मलपर्यायवाचकाः ॥ (तत्त्वप्रकाश- श्लो.सं-12)

मलं, अज्ञानं, तमः, अज्ञात्वं, तिरस्कारकत्वं अविद्या चेति पर्यायवाचकाः। मलः स्वरूपेण एक अपि तस्य शक्तयः भिन्नाः भवन्ति। अतः एकः अज्ञानात् मुक्तः सर्वेषां मुक्तिः न संभवति। मोहो मदश्च रागश्च विषादशोष एव च वैचित्र्यं चैव हर्षारूपः सप्तेते सहजाः मलाः जीवानां सहजमलाः भवन्ति मोहादयस्सप्त। अयं मलः बौद्धं पौरुषेयमिति विभज्यते। उक्तञ्च -

बौद्धं च पौरुषेयं च द्विविधं तन्मलं स्मृतम्

तत्र दीक्षादिना याति पौरुषेयं मलं क्षयम् ॥ ( तन्त्रसारः - 4/5)

बौद्धाज्ञाननिवृत्तौ तु विकल्पोन्मूलनाद् ध्रुवम् तदेव मोक्ष इत्युक्तं धात्रा श्रीमन्निशाटने दीक्षादिकर्मणा पौरुषमलक्षयः संभवति, तथा समस्ताविकल्पोन्मूलनेन बौद्धमलानां क्षय इति ज्ञायते।

**तिरोधानशक्तिपाशः।**

तिरोधानशक्तिः द्वितीयः पाशः। परमेश्वरस्य शक्त्यधीना भवन्ति मलाः, अत एव ते अस्वतन्त्राश्च। माहेश्वरी शैवीशक्तिः तासां मलशक्तीनां धर्मानुवर्तनात् पाशतया उपचर्यते। सानुग्रहकशाक्तित्वात् नास्याः मुख्यं पाशत्वं सा समस्तजगदनुग्रहस्वभावा शिवा उच्यते च। शिवस्य शक्तिः सर्वेषां सर्वानुग्रहकारिणी पाशधर्मनिरोधेन पाशानां पाशहेतुना। निवृत्तियोग्यतां तेषां करोतीति यतस्ततः पाशधर्मनिरोधाच्च विधत्ते पश्वनुग्रहम्। तत्त्वप्रकाशः

**महामाया ( बिन्दुः)**

शुद्धमार्गस्य मूलभूतं उपादानकारणं भवति वागीश्वरी महामाया। परा वागीश्वरी विद्या माया अविद्या अपरा स्मृता इति पौष्करवचनानुसारेण वागीश्वर्याः परात्वं विद्यात्वं तथा मायायाः अपरात्वं अविद्यात्वं च उक्तमस्ति महामायायाः बिन्दुतादादि बहूनि पर्यायनामानि सन्ति।

सिद्धो नादः परसुमङ्गला मालिनी महामाया

समनानाहता बिन्दुरघोरा वाग् ब्रह्मकुण्डलिनी

तत्त्वं विद्याख्यं चेत्युक्तस्तैस्तैः शब्दैस्तदागमेष्वित्थम् - (शतरत्नसंग्रहः पु.41)

परा-पश्यन्ती-मध्यमा- वैखरी चेति चतस्रो वृत्तयः तस्थाः निरूपिताः भवन्ति महामायायाः सकाशात् नादबिन्द्वादिकार्यं निष्पद्यते। सा महामाया सृष्टेः परमकारणम्।

**माया**

माति अस्यां प्रलये सर्वं जगत्, मयति जगत् इति मायाशब्दस्य निष्पत्तिः सिद्धान्तानुसारेण वर्णितः भवति। तल्लक्षणं तु एवमुक्तम् शतरत्नसंग्रहे - मायातत्त्वं जगद्बीजमविनाश्याशीवात्मकम् विभ्वेकमकलं सूक्ष्ममनाद्यव्ययमीश्वरम् प्रलये सर्वं जगदस्यां लीनं भवति विनाशरहितत्त्वात् अविनाशि इयं सर्वविकाराणामुपादानकारणं भवति।

उक्तञ्च- मायातत्त्वात् कलानियतिनाम्नोः तत्त्वयोरुत्पत्तिः, कलातत्त्वात् विद्यारागतत्त्वयोः प्रधानतत्त्वस्य च

त्रयाणामुत्पत्तिः, श्रीकण्ठक्षोभितात् प्रधानतत्त्वात् सत्वरजस्तमसामभिव्यक्तिः, तेभ्यः बुद्धितत्त्वस्य उत्पत्तिः च संभवति। ततः त्रिविधाहङ्कारस्य तैजसाहङ्कारात् मनसः ज्ञानेन्द्रियाणां च, वैकारिकाहङ्कारात् कर्मेन्द्रियाणां तामसाहङ्कारात् पञ्चतन्मात्राणां ततः आकाशादिपञ्चभूतानामुत्पत्तिः।

**कर्म**

धर्माधर्मात्मकं कर्म तच्च त्रिविधमर्थतः।

जात्यायुर्भोगदं येन नामिश्रं पच्यते क्वचित् ॥ इति विश्वसारसूत्रे कर्मलक्षणमुक्तं दृश्यते। धर्माधर्मात्मकं भवति कर्म। तत् जातिप्रदम्, आयुप्रदं, भोगप्रदं चेति त्रिविधं भवति। योगसूत्रे सति मूले तद्विपाको जात्यायुर्भोगाः इत्येवं समर्थितम्। जातिः देवत्वादि, आयुः शतवर्षजीवनादिभोगः सुखदुःखादेरनुभवश्च। फलाविपर्ययत्वे कर्मेव कारणमित्यवगन्तव्यम्।

कर्म दृष्टं अदृष्टमिति च द्विविधमिति मृगेन्द्रसूत्रे परामृष्टं भवति। अदृष्टं कर्म देहेन्द्रियभुवनादीनामुत्पादकं धारकं आध्यात्मिकादित्रितयसाधकं च भवति। इष्टदेवतानुध्याननमस्कारादिकं धर्मात्मकम्। परधनहरणेच्छादिकं कर्म अधर्मात्मकम् तत्कर्म स्वापे परिपाकं प्राप्नोति, सृष्टिकाले उपयोगमिति संहारकाले मायामाश्रित्य तिष्ठति मोहमूलानि कर्माणि संसृतिकारणानि भवन्ति परमेश्वरसमर्पणबुद्ध्या यत्कर्म क्रियते तदेव पावनं भोगादिना कर्मणां क्षये मुक्तः जीवः परमां शान्तिं लभते।

आगमसाहित्यानुसारेण शैवदर्शनं नकुलपाशुपतादिभेदेन बहुधा विभक्तं भवति। शैवदर्शने पतिपशुपाशरूपं त्रिविधं तत्त्वमङ्गीकुर्वन्ति। परमेश्वरः शिव एव चैतन्यस्वरूपः। स एव पतिशब्देन व्यवहियते। पतेः अधीनतया इच्छाज्ञानक्रियाशक्तिद्वारा जगतः उत्पत्तिस्थितिलयाः जीवः पशुपदेन संज्ञितः। विज्ञानाकलप्रलयाकलसकलरूपेण त्रिधा विभक्तानां जीवानां स्वरूपज्ञानं मुक्त्यर्थमावश्यकं भवति। पञ्चविद्यानां मलादिपाशानां असंस्पर्शे जीवः शिवसाम्यं मोक्षं प्राप्नोति इति शैवागमसिद्धान्तसारः॥

**सहायकग्रन्थाः**


1. सर्वदर्शनसंग्रहः
2. An outline of Saiva Philosophy, K.C. Pandey, 1986.
3. शैवपरिभाषा, ज्ञानशिवाचार्यः, मद्रास् ओरियन्टल् रिसर्च् इन्स्टिट्यूट्.
4. Saiva Siddhantha , V, Paranjothi, LUZA& CO LTD London,1954.
5. The Saivagamas, M.Arunachalam, Gandhividyalayam, Kalakshetrapress,Madrass.